# गुरु अष्टकं

शरीरं सुरूपं तथा वा कळत्रं
यशश्चारु चित्रं धनं मेरुतुल्यं ।
मनश्चेन लग्नं गुरोरंघ्रि पद्मे
ततः किं ततः किं, ततः किं ततः किं ॥ 1

कळत्रं धनं पुत्रपौत्राधि सर्वं
गृहं बांधवा सर्वमेताद्धि जातं ।
मनश्चेन लग्नं गुरोरंघ्रि पद्मे
ततः किं ततः किं, ततः किं ततः किं ॥ 2

षडंगादि वेदो मुखे शास्त्र विद्य
कवित्वादि गद्यं, सुपद्यं करोति ।
मनश्चेन लग्नं गुरोरंघ्रि पद्मे
तथ किं तथ किं, तथ किं तथ किं ॥ 3

विदेशेषु मान्यः, स्वदेशेषु धन्यः
सदाचार वृत्तेषु मत्तो न चान्याः ।
मनश्चेन लग्नं गुरोरंघ्रि पद्मे
ततः किं ततः किं, ततः किं ततः किं ॥ 4

© 2022 Vedam Nadam

क्षमामंडले भूपभूपाल वृंदै
सदा सेवितं यस्य पादारविंदं ।
मनश्चेन लग्नं गुरोरंघ्रि पद्मे
ततः किं ततः किं, ततः किं ततः किं ॥ 5

यशो मे गतं धिक्षु दान प्रताप
जगद्वस्तु सर्वं करे यः प्रसादत् ।
मनश्चेन लग्नं गुरोरंघ्रि पद्मे
ततः किं ततः किं, ततः किं ततः किं ॥ 6

न भोगे, न योगे, न वा वाजि राजौ
न कांता मुखे नैव वित्तेषु चित्तम् ।
मनश्चेन लग्नं गुरोरंघ्रि पद्मे
ततः किं ततः किं, ततः किं ततः किं ॥ 7

अरण्ये न वासस्य गेहे न कार्ये
न देहे मनो वर्तते मे त्वनर्घ्ये ।
मनश्चेन लग्नं गुरोरंघ्रि पद्मे
ततः किं ततः किं, ततः किं ततः किं ॥ 8

© 2022 Vedam Nadam

**। फल श्रुतिः: ।**

गुरोरष्टकं यः पठेत् पुण्यदेहि
यतिर्भूपतिर्ब्रह्मचारी च गेही ।
लबेत् वांछितार्थम् पदम् ब्रह्मसज्ञं
गुरोरुक्त वाक्ये, मनो यस्य लग्नम् ॥ 9

॥ इति श्री शंकराचार्य विरचित गुरु अष्टकं संपूर्णम् ॥